## भोज्यं भक्ष्ये। (६९/२८८७)

भोज्यम् निपात्यते [1]भक्ष्येऽभिधेये। भोज्यः ओदनः। भोज्या यवागूः। इह भक्ष्यम् अभ्यवहार्यमात्रम्[2]। भक्ष्ये इति किम्? भोग्यः कम्बलः[3]॥

## घोर्लोपो लेटि वा। (७०/३५८४)

घुसञ्ज्ञकानां [4]लेटि परतो वा लोपो भवति[5]। 'दधद्रत्नानि दाशुषे' (ऋ.४.१५.३)। 'सोमो ददद् गन्धर्वाय' (ऋ. १०.८५.४१)। न च भवति। यदग्निरग्नये ददात्। आडागमे [6]सति लोपेऽपि ददात् इति [7]सिद्धं भवति। तत्र वावचनं विस्पष्टार्थम्, एषा हि कस्यचिदाशङ्का स्यात्, ददात् इत्येव नित्ये प्राप्ते लोपः आरभ्यमाणो बाधते एव एतद् रूपम् इति॥

## ओतः श्यनि। (७१/२५१०)

[8]ओकारान्तस्याङ्गस्य श्यनि परतो लोपो भवति। शो – निश्यति। छो – अवछ्यति। द्यो – अवद्यति। सो – अवस्यति[9]॥

## क्सस्याचि। (७२/२३३७)

क्सस्य अजादौ प्रत्यये लोपो भवति। अधुक्षाताम्। अधुक्षाथाम्। अधुक्षि। अचि इति किम्? अधुक्षत्। अधुक्षताम्। [10]ककारवतः उपादानं किम्? इह मा भूत्, उत्सौ। उत्साः। वत्सौ। वत्साः॥

## लुग् वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। (७३/२३६६)

[11]दुह दिह लिह गुह इत्येतेषामङ्गानामात्मनेपदे दन्त्यादौ परतः क्सस्य वा लुग् भवति। अदुग्ध, अधुक्षत। अदुग्धाः, अधुक्षथाः। अदुग्ध्वम्, अधुक्षध्वम्। अदुह्वहि, अधुक्षावहि। दिह – अदिग्ध, अधिक्षत। लिह – अलीढ, अलिक्षत। गुह – न्यगूढ, न्यघुक्षत[12]। दुहादीनाम् इति किम्? व्यत्यपुक्षत। आत्मनेपदे इति किम्? अधुक्षत्। दन्त्ये इति किम्? अधुक्षामहि। लोप इति [13]वर्तमाने लुग्ग्रहणं [14]सर्वादेशार्थम्। तच्च वह्यर्थम्। अन्यत्र तु अन्त्यस्यैव लोपे कृते 'झलो झलि' (८.२.२६/२२८१) इति सकारलोपेन सिध्यति। स्थानिवद्भावोऽपि अकारलोपस्य नास्ति, '[15]पूर्वत्रासिद्धे न स्थानिवत्' (पु.बृ.११२) इति। दन्त्योष्ठो[16]ऽपि वकारो [17]दन्त्य इति गृह्यते। यदि स न गृह्येत ततः [18]तौग्रहणमेवात्र कृतं स्यात्॥

---

1. भक्ष्यं चेत् तद्भवति क. 2. गृह्यते इत्यधिकम् क. 3. आलम्बनीयः इत्यर्थः इत्यधिकम् इ. ह भोग्या स्त्री भोग्यं सुखम् इत्यधिकम् ह. 4. णिचि क. 5. ददाति ददति। दधाति दधति इत्यधिकम् क. 6. कृते' नित्ये लोपे क. 7. सिध्यति क.इ. 8. लोप इति वर्तते इत्यधिकम् इ.ह. 9. तपरकरणं मुखसुखार्थम् इत्यधिकम् इ, तपरकरणमुच्चारणार्थम् इत्यधिकम् ह. 10. ककारवतः – वत्साः नास्ति इ.क.ह. 11. क्स इति वर्तते इत्यधिकम् क.इ.ह. 12. अगूढाः अघुक्षथाः। अगूढ्वम् अघुक्षध्वम् अगुह्वहि अघुक्षावहि इत्यधिकम् क. 13. वर्तते ह. 14. सर्वलोपार्थम् क.इ. 15. पुर्वत्रासिद्धेन ब, पूर्वत्रासिद्धये क. 16. अपि नास्ति क. 17. दन्त्यग्रहणे न क. 18. तौ इत्येव ब्रूयात् ह.